# अष्टोत्तरशतनामावलिकदम्बम्

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण
यमनियमासनप्रत्याहार-प्राणायामधारणाध्यानसमाध्यष्टाङ्ग-
योगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न-श्रीसङ्कराचार्यगुरुपरम्परा-
प्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर
सकलनिगमागमसारहृदय साङ्ख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक
सर्वतन्त्रस्वतन्त्रादिराजधानी-विद्यानगरमहाराजधानी-
कर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरु-भूमण्डलाचार्य
ऋष्यश‍ृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासी-
श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु-श्रीमदभिनवविद्यातीर्थ-
स्वामिगुरुकमलसञ्जात श्रीजगद्गुरु-श‍ृङ्गेरी-
श्रीभारतीतीर्थस्वामिचरणारविन्दयोः साष्टाङ्गप्रणामः ॥

यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनायकाय ॥

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्
रत्नाकल्पोज्वलाङ्गं परशुमृगधराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानासमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पाद शङ्करं लोकशङ्करं ॥
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवत्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥
गुकारस्त्वन्धराको वै रुकारस्तन्निवर्तकः ।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

माला सुधाकुम्भ विबोधमुद्रा विद्याविराजत्करवारिजाताम् ।
अपारकारुण्यसुधाम्बुराशिं श्रीशारदाम्बां प्रणतोस्मि नित्यम् ॥

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुवरान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि ॥

लम्बिकायोगनिरतं अम्बिकापतिरूपिणम् ।
विद्याप्रदं नमामीशं विद्यातीर्थ महेश्वरम् ॥

अविनयमपनय विष्णो दमय मनश्शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरता ॥

मयूराधिरूढं महावाक्यगूढं मनोहारिदेहं महच्चित्तगेहम् ।
महीदेवदेवं महादेवभावं महादेवबालं भजेलोकपालम् ॥

नमो गौरीशाय स्फटिकधवलांगाय च नमो
नमो लोकेशाय स्तुतविबुधलोकाय च नमः ।
नमः श्रीकण्ठाय क्षपितपुरदैत्याय च नमो
नमः फालाक्षाय स्मरमदविनाशाय च नमः ॥

शरत्पूर्णचन्द्रप्रभापूर्णबिम्बाधरस्मेरवक्त्रारविन्दां सुशान्ताम् ।
सुरत्नावलीहार ताटङ्कशोभां महासुप्रसन्नां भजे श्री भवानीम् ॥
वन्दारुजनमन्दारम् इन्दुचूडतनूभवम् ।
सिन्दूर बन्धूरमुखं वन्दे स्तम्बेरमाननम् ॥

शान्तामानसहंसं कान्तारासक्त मुनिवरैस्सेव्यम् ।
शान्ताहङ्कृतिवेद्यं कान्तार्धं नौमि श्रृंगशिवम् ॥

विश्वं मायामयत्वेन रूपितं यत् प्रबोधतः ।
विश्वं च यत्स्वरूपं तं वार्तिकाचार्यमाश्रये ॥

अविद्यारण्यकान्तारे भ्रमतां प्राणीनां सदा ।
विद्यामार्गोपदेष्टारं विद्यारण्यगुरुं श्रये ॥

श्रीसच्चिदानन्दशिवाभिनव्यनृसिंहभारत्यभिधान् यतीन्द्रान्
विद्यानिधीन् मन्त्रनिधीन् सदात्मनिष्ठान् भजे मानवशम्भुरूपान् ॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥

विवेकिनं महाप्राज्ञं धैर्योदार्यक्षमानिधिम् ।
सदाऽभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥

भारतीकरुणामब्धतीर्थराजतपोनिधिम् ।
भक्तबोधप्रदं पूज्यं भारतीतीर्थमाश्रये ॥

अज्ञानां जाह्नवी-तीर्थं विद्यातीर्थं विवेकिनाम् ।

सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥

# विषयानुक्रमनिका


| | |
|---|---|
| श्रीगणेशाष्टोत्तरशतनामस्तोत्रम् | 8 |
| श्रीगणेशाष्टोत्तरशतनामावलिः | 10 |
| शिवाष्टोत्तरशतनामावलिः | 13 |
| श्रीसुब्रह्मण्य-स्वामिगिरिमाहात्म्योक्ता नामावलिः | 16 |
| श्रीहरिहरपुत्राष्टोत्तरशतनामावलिः | 19 |
| श्रीललिताष्टोत्तरशतनामावलिः | 22 |
| श्रीललिताष्टोत्तरशतनामावलिः (२) | 25 |
| श्रीललिताष्टोत्तरशतनामावलिः (३) | 27 |
| श्रीहनुमतष्टोत्तरशतनामावलिः | 31 |
| नवग्रहाणां समुच्चयाष्टोत्तरशतनामावलिः | 34 |
| श्रीविष्णोः अष्टोत्तरशतनामावलिः | 37 |
| श्रीलक्ष्म्याः अष्टोत्तरशतनामावलिः | 40 |
| श्रीसरस्वत्यष्टोत्तरशतनामावलिः | 43 |
| श्रीदुर्गाष्टोत्तरशतनामावलिः | 46 |
| वेङ्कटेश्वर-वराहपूराणान्तर्गत-अष्टोत्तरशतनामावलिः | 49 |
| श्रीसुदर्शनाष्टोत्तरशतनामावलिः | 52 |
| श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः | 54 |

## श्रीगणेशाष्टोत्तरशतनामस्तोत्रम्

विनायको विघ्नराजः गौरीपुत्रो गणेश्वरः ।
स्कन्दाग्रजोऽव्ययः पूतः दक्षोऽध्यक्षो द्विजप्रियः ॥

अग्निगर्भच्छिदिन्द्रश्रीप्रदो वाणीप्रदोऽव्ययः ।
सर्वसिद्धिप्रदः शर्वतनयः शर्वरीप्रियः ॥

सर्वात्मकः सृष्टिकर्ता देवोऽनेकार्चितः शिवः ।
शुद्धो बुद्धिप्रियः शान्तः ब्रह्मचारी गजाननः ॥

द्वैमात्रेयो मुनिस्तुत्यः भक्तविघ्नविनाशनः
एकदन्तः चतुर्बाहुः चतुरः शक्तिसंयुतः ॥

लम्बोदरः शूर्पकर्णः हरिर्ब्रह्मविदुत्तमः ।
कालो ग्रहपतिः कामी सोमसूर्याग्निलोचनः ॥

पाशाङ्कुशधरश्चण्डः गुणातीतो निरञ्जनः ।
अकल्मषः स्वयंसिद्धः सिद्धार्चितपदाम्बुजः ॥

बीजपूरफलासक्तः वरदः शाश्वतः कृती ।
द्विजप्रियः वीतभयः गदी चक्रीक्षचापधृत् ॥

श्रीदोऽज उत्पलकरः श्रीपतिः स्तुतिहर्षितः ।
कुलाद्रिभेत्ता जटिलः कलिकल्मषनाशनः ॥

चन्द्रचूडामणिः कान्तः पापहारी समाहितः ।

आश्रितः श्रीकरः सौम्यः भक्तवाञ्छितदायकः ॥

शान्तः कैवल्यसुखदः सच्चिदानन्दविग्रहः ।
ज्ञानी  दयायुतो दान्तः ब्रह्मद्वेषविवर्जितः ॥

प्रमत्तदैत्यभयदः श्रीकण्ठो विबुधेश्वरः ।
रमार्चितो विधिर्नागराजयज्ञोपवीतवत ॥

स्थूलकण्ठः स्वयङ्कर्त्ता सामघोषप्रियः परः ।
स्थूलतुण्डोऽग्रणीर्धीरः वागीशः सिद्धिदायकः ॥

दूर्वाबिल्वप्रियोऽव्यक्त-मूर्तिरद्भुतमूर्तिमत् ।
शैलेन्द्रतनुजोत्सङ्गखेलनोत्सुकमानसः ॥

स्वलावण्यसुधासार-जितमन्मथविग्रहः ।
समस्तजगदाधारो मायी मूषकवाहनः ॥

हृष्टस्तुष्टः प्रसन्नात्मा सर्वसिद्धिप्रदायकः ।
अष्टोत्तरशतेनैव नाम्नां विघ्नेश्वरं विभुम् ॥

तुष्टाव शङ्करः पुत्रं त्रिपुरं हन्तुमुद्यतः ।
यः पूजयेत् अनेनैव भक्त्या सिद्धिविनायकम् ॥

दुर्वादलैर्बिल्वपत्रैः पुष्पैर्वाचन्दनाक्षतैः ।
सर्वान् कामानवप्नोति सर्वविघ्नैः प्रमुच्यते ॥

इति श्रीगणेश-अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्

# श्रीगणेशाष्टोत्तरशतनामावलिः

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचनः ।
प्रीतो भवतु मे नित्यं वरदाता विनायकः ॥
गजाननं गणपतिं गुणानामालयं परम् ।
तं देवं गिरिजासूनुं वन्देऽहम् अमरार्चितम् ॥

गजवदनम् अचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रम्
बृहदुदरम् अशेषं पूतरूपं पुराणम् ।
अमरवरसुपूज्यं रक्तवर्णं सुरेशम्
पशुपतिसुतम् ईशं विघ्नराजं नमामि ॥

हरिहरविरिञ्चिवासवाद्यैः अपि कृतपूजमुपक्रमे क्रियायाः
सकलदुरितहरम् अम्बिकायायाः प्रथमसुतं प्रणमामि विघ्नराजम् ॥

ध्यायेन्नित्यं गणेशं परमगुणयुतं ध्यानसंस्थं त्रिनेत्रम्
एकं देवं त्वमेकं परमसुखयुतं देवदेवं प्रसन्नम्
शुण्डादण्डाढ्यगण्डोद्गलितमदजलोल्लोलमत्तालिमालम्
श्रीदन्तं विघ्नराजं सकलसुखकरं श्रीगणेशं नमामि ॥

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरया श्लिष्टोज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥
ॐ विनायकाय नमः विघ्नराजाय

गौरीपुत्राय
गणेश्वराय
स्कन्दाग्रजाय
अव्ययाय
पूताय
दक्षाय
अध्यक्ष्याय
द्विजप्रियाय 10
अग्निगर्भच्छिदे
इन्द्रश्रीप्रदाय
वाणीप्रदाय
अव्ययाय
सर्वसिद्धिप्रदाय
शर्वतनयाय
शर्वरीप्रियाय
सर्वात्मकाय
सृष्टिकर्त्रे
देवाय 20
अनेकार्चिताय
शिवाय
शुद्धाय
बुद्धिप्रियाय
शान्ताय
ब्रह्मचारिणे
गजाननाय
द्वैमातुराय
मुनिस्तुत्याय
भक्त-विघ्न-विनाशनाय 30

एकदन्ताय
चतुर्बाहवे
चतुराय
शक्तिसंयुताय
लम्बोदराय
शूर्पकर्णाय
हरये
ब्रह्मविदुत्तमाय
कालाय
ग्रहपतये 40
कामिने
सोमसूर्याग्निलोचनाय
पाशाङ्कुशधराय
चण्डाय
गुणातीताय
निरञ्जनाय
अकल्मषाय
स्वयंसिद्धाय
सिद्धार्चितपदाम्बुजाय
बीज(जा)पूरफलासक्ताय 50
वरदाय
शाश्वताय
कृतिने
द्विजप्रियाय
वीतभयाय
गदिने
चक्रिणे
इक्षचापधृते

श्रीदाय
अजाय 60
उत्पलकराय
श्रीपतये
स्तुतिहर्षिताय
कुलाद्रिभेत्रे
जटिलाय
कलिकल्मषनाशनाय
चन्द्रचूडामणये
कान्ताय
पापहारिणे
समाहिताय 70
आश्रिताय
श्रीकराय
सौम्याय
भक्तवाञ्छितदायकाय
शान्ताय
कैवल्यसुखदाय
सच्चिदानन्दविग्रहाय
ज्ञानिने
दयायुताय
दान्ताय 80
ब्रह्मद्वेषविवर्जिताय
प्रमत्तदैत्यभयदाय
श्रीकण्ठाय
विबुधेश्वराय
रमार्चिताय
विधये
नागराजयज्ञोपवीतवते
स्थूलकण्ठाय
स्वयङ्कर्त्रे
सामघोषप्रियाय 90
पराय
स्थूलतुण्डाय
अग्रण्ये
धीराय
वागीशाय
सिद्धिदायकाय
दूर्वाबिल्वप्रियाय
अव्यक्तमूर्तये
अद्भुतमूर्तिमते
शैलेन्द्रतनुजोत्सङ्ग-
खेलनोत्सुकमानसाय 100
स्वलावण्यसुधासार-
जितमन्मथविग्रहाय
समस्तजगदाधाराय
मायिने
मूषकवाहनाय
हृष्टाय
तुष्टाय
प्रसन्नात्मने
सर्वसिद्धिप्रदायकाय 108

श्रीगणेशाष्टोत्तरशतनामावलिः समाप्ता

# शिवाष्टोत्तरशतनामावलिः

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्
रत्नाकल्पोज्वलाङ्गं परशुमृगधराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

| | | | |
|---|---|---|---|
| ॐ शिवाय | नमः | शितिकण्ठाय | |
| महेश्वराय | | शिवाप्रियाय | |
| शम्भवे | | उग्राय | |
| पिनाकिने | | कपालिने | |
| शशिशेखराय | | कामारये | |
| वामदेवाय | | अन्धकासुरसूदनाय | |
| विरूपाक्शाय | | गङ्गाधराय | |
| कपर्दिने | | ललाटाक्षाय | |
| नीललोहिताय | | कालकालाय | |
| शङ्कराय | 10 | कृपानिधये | 30 |
| शूलपाणये | | भीमाय | |
| खट्वाङ्गिने | | परशुहस्ताय | |
| विष्णुवल्लभाय | | मृगपाणये | |
| शिपिविष्टाय | | जटाधराय | |
| अम्बिकानाथाय | | कैलाशवासिने | |
| श्रीकण्ठाय | | कवचिने | |
| भक्तवत्सलाय | | कठोराय | |
| भवाय | | त्रिपुरान्तकाय | |
| शर्वाय | | वृषाङ्काय | |
| त्रिलोकेशाय | 20 | वृषभारूढाय | 40 |

भस्मोद्धूलित-विग्रहाय
सामप्रियाय
स्वरमयाय
त्रयीमूर्तये
अनीश्वराय
सर्वज्ञाय
परमात्मने
सोमसूर्याग्निलोचनाय
हविषे
यज्ञमयाय 50
सोमाय
पञ्चवक्त्राय
सदाशिवाय
विश्वेश्वराय
वीरभद्राय
गणनाथाय
प्रजापतये
हिरण्यरेतसे
दुर्धर्षाय
गिरीशाय 60
गिरिशाय
अनघाय
भुजङ्गभूषणाय
भर्गाय
गिरिधन्वने
गिरिप्रियाय
कृत्तिवाससे
पुरारातये
भगवते
प्रमथाधिपाय 70
मृत्युञ्जयाय
सूक्ष्मतनवे
जगद्व्यापिने
जगद्गुरवे
व्योमकेशाय
महासेनजनकाय
चारुविक्रमाय
रुद्राय
भूतपतये
स्थाणवे 80
अहिर्बुध्न्याय
दिगम्बराय
अष्टमूर्तये
अनेकात्मने
सात्विकाय
शुद्धविग्रहाय
शाश्वताय
खण्डपरशवे
अज्ञाय
पाशविमोचकाय 90
मृडाय
पशुपतये
देवाय
महादेवाय
अव्ययाय
हरये

पूषदन्तभिधे
अव्यग्राय
दक्षाध्वरहराय
हराय 100
भगनेत्रभिदे
अव्यक्ताय
सहस्राक्षाय
सहस्रपदे
अपवर्गप्रदाय
अनन्ताय
तारकाय
परमेश्वराय 108

श्रीशिवाष्टोत्तरशतनामावलिः समाप्ता

## श्रीसुब्रह्मण्य-स्वामिगिरिमाहात्म्योक्ता नामावलिः

सुब्रह्मण्यमजं शान्तं कुमारं करुणालयम् ।
किरीटहारकेयूरमणिकुण्डलमण्डितम् ॥
षण्मुखं युगषड्बाहुं शूलाद्यायुधधारिणम् ।
स्मितवक्त्रं प्रसन्नाभं स्तूयमानं सदा बुधैः ॥
वल्लीदेवीप्राणनाथं वाञ्छितार्थप्रदायकम् ।
सिंहासने सुखासीनं कोटिसूर्य समप्रभम् ।
ध्यायामि सततं भक्त्या देवसेनापतिं गुहम् ॥

ॐ स्कन्दाय नमः
गुहाय
षण्मुखाय
फालनेत्रसुताय
प्रभवे
पिङ्गलाय
कृत्तिकासूनवे
शिखिवाहनाय
द्विषड्भुजाय
द्विषण्णेत्राय 10
शक्तिधराय
पिशिताशप्रभञ्जनाय
तारकासुरसंहारिणे
रक्षोबलविमर्दनाय
मत्ताय
प्रमत्ताय
उन्मत्ताय
सुरसैन्यसुरक्षित्रे
देवासेनापतये
प्राज्ञाय 20
कृपालवे
भक्तवत्सलाय
उमासुताय
शक्तिधराय
कुमाराय
क्रौञ्चदारणाय
सेनान्ये
अग्निजन्मने
विशाखाय
शङ्करात्मजाय 30
शिवस्वामिने
गणस्वामिने

सर्वस्वामिने
सनातनाय
अनन्तशक्तये
अक्षोभ्याय
पार्वतीप्रियनन्दनाय
गङ्गासुताय
शरोद्भूताय
पावकात्मजाय 40
आत्मभुवे
जृम्भाय
प्रजृम्भाय
उज्जृम्भाय
कमलासनसंस्तुताय
एकवर्णाय
द्विवर्णाय
त्रिवर्णाय
चतुर्वर्णाय
पञ्चवर्णाय 60
परस्मैज्योतिषे
प्रजापतये
अग्निगर्भाय
शमीगर्भाय
विश्वरेतसे
सुरारिघ्ने
हिरण्यरेतसे
शुभकृते
वसुमते
वटुवेषधृते 60

पूष्णे
गभस्तये
गहनाय
चन्द्रवर्णाय
कलाधराय
मायाधराय
महामायिने
कैवल्याय
सकलात्मकाय
विश्वयोनये 70
अमेयात्मने
तेजोनिधये
अनामयाय
परमेष्ठिने
परस्मै ब्रह्मणे
वेदगर्भाय
विराड्वपुषे
पुलिन्दकन्याभर्त्रे
महासारस्वतप्रदाय
आश्रिताखिलदात्रे 80
चोरघ्नाय
रोगनाशनाय
अनन्तमूर्तये
आनन्दाय
शिखण्डिकृतकेतनाय
डम्भाय
परमडम्भाय
महाडम्भाय

वृषाकपये
कारणोपात्तदेहाय 90
कारणातीतविग्रहाय
अहिरूपाय
अमृतवपुषे
प्राणायामपरायणाय
विरुद्धहन्त्रे
वीरघ्नाय
रक्तश्यामाय
सुपिङ्गलाय
बहुवर्णाय
गोपतये 100
दाक्षिणात्यवरप्रदाय
सर्वेश्वराय
लोकगुरवे
असुरानीकमर्दनाय
सुब्रह्मण्याय
गुहाप्रीताय
ब्रह्मण्याय
ब्राह्मणप्रियाय 108

श्रीसुब्रह्मण्याष्टोत्तरशतनामावलिः समाप्ता

# श्रीहरिहरपुत्राष्टोत्तरशतनामावलिः

आश्याम-कोमल-विशालतनुं विचित्र-
वासोदधानमरुणोत्पल-दामहस्तम् ।
उत्तुङ्गरत्न-मकुटं कुटिलाग्रकेशम्
शास्तारमिष्टवरदं प्रणतोऽस्ति नित्यम् ॥

ॐ महाशास्त्रे नमः
विश्वशास्त्रे
लोकशास्त्रे
धर्मशास्त्रे
वेदशास्त्रे
कालशास्त्रे
गजाधिपाय
गजारूढाय
गणाध्यक्षाय
व्याघ्रारूढाय 10
महाद्युताय
गोप्त्रे
गीर्वाणसंसेव्याय
गतातङ्काय
गणाग्रण्ये
ऋग्देवरूपाय
नक्षत्राय
चन्द्ररूपाय
बलाहकाय
दुर्वाश्यामाय 20
महारूपाय
क्रूरदृष्टये
अनामयाय
त्रिनेत्राय
उत्पलकराय
कालहन्त्रे
नराधिपाय
खण्डेन्दुमौलितनयाय
कल्हारकुसुमप्रियाय
मदनाय 30
माधवसुताय
मन्दारकुसुमार्चिताय
महाबलाय
महोत्साहाय
महापापविनाशनाय
महाशूराय
महाधीराय
महासर्पविभूषणाय
असिहस्ताय
शरधराय 40

हालाहलधरात्मजाय
अर्जुनेशाय
अग्निनयनाय
अनङ्गमदनातूराय
दुष्टग्रहाधिपाय
श्रीदाय
शिष्टरक्षणदीक्षिताय
कस्तूरीतिलकाय
राजशेखराय
राजसत्तमाय 50
राजराजार्चिताय
विष्णुपुत्राय
वनजनाधिपाय
वर्चस्कराय
वररुचये
वरदाय
वायुवाहनाय
वज्रकायाय
खड्गपाणये
वज्रहस्ताय 60
बलोद्धताय
त्रिलोकज्ञाय
अतिबलाय
पुष्कलाय
वृत्तपावनाय
पूर्णाधवाय
पुष्कलेशाय
पाशहस्ताय

भयापहाय
फट्काररूपाय 70
पापघ्नाय
पाषण्डरूधिराशनाय
पञ्चपाण्डवसंत्रात्रे
परपञ्चाक्षराश्रिताय
पञ्चवक्रसुताय
पूज्याय
पण्डिताय
परमेश्वराय
भवतापप्रशमनाय
भक्ताभीष्टप्रदायकाय 80
कवये
कवीनामधिपाय
कृपालवे
क्लेशनाशनाय
समाय
अरूपाय
सेनान्ये
भक्तसंपत्प्रदायकाय
व्याघ्रचर्मधराय
शूलिने 90
कपालिने
वेणुवादनाय
कम्बुकण्ठाय
कलरवाय
किरीटादिविभूषिताय
धूर्जटये

वीरनिलयाय
वीराय
वीरेन्द्रवन्दिताय
विश्वरूपाय 100
वृषपतये
विविधार्थफलप्रदाय
दीर्घनासाय
महाबाहवे
चतुर्बाहवे
जटाधराय
सनकादिमुनिश्रेष्ठस्तुत्याय
हरिहरात्मजाय 108

श्रीहरिहरपुत्राष्टोत्तरशतनामावलिः समाप्ता

## श्रीललिताष्टोत्तरशतनामावलिः

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्-
तारानायकशेखरां स्मितममुखीम् आपीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीम्
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामम्बिकाम् ॥

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

ध्यायेत् पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीम्
हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम् ।
सर्वालङ्कार-युक्तां सततमभयदां भक्तनम्रां भवानीम्
श्रीविद्यां शान्तमूर्तिं सकलसुरनुतां सर्वसम्पत्प्रदात्रीम् ॥

ॐ भूरूपसकलाधारायै नमः
बीजौषध्यन्नरूपिण्यै
जरायुजाण्डजोद्भिज्ज-स्वेदजादिशरीरिण्यै
क्षेत्ररूपायै
तीर्थरूपायै
गिरिकाननरूपिण्यै
जलरूपाखिलाप्यायायै
तेजः पुञ्जस्वरूपिण्यै
जगत्प्रकाशिकायै
अज्ञानतमोहृद्भानुरूपिण्यै 10
वायुरूपायै
अखिलव्याप्तायै
उत्पत्यादिविधायिन्यै
नभोरूपायै
इन्दुसूर्यादि-ज्योतिर्भूतावकाशदायै
घ्राणरूपायै
गन्धरूपायै
गन्धग्रहणकारिण्यै
रसनायै
रसरूपायै 20
रसग्रहणकारिण्यै
चक्षुरूपायै
रूपरूपायै
रूपग्रहणकारिण्यै

त्वग्रूपायै
स्पर्शरूपायै
स्पर्शग्रहणकारिण्यै
श्रोत्ररूपायै
शब्दरूपायै
शब्दग्रहणकारिण्यै 30
वागिन्द्रियस्वरूपायै
वाचावृत्तिप्रदायिन्यै
पाणीन्द्रियस्वरूपायै
क्रियावृत्तिप्रदायिन्यै
पादेन्द्रियस्वरूपायै
गतिवृत्तिप्रदायिन्यै
पाय्विन्द्रियस्वरूपायै
विसर्गार्थैककारिण्यै
रहस्येन्द्रियरूपायै
विषयानन्ददायिन्यै 40
मनोरूपायै
सङ्कल्पविकल्पादि-
स्वरूपिण्यै
सर्वोपलब्धिहेतवे
बुद्धिनिश्चयरूपिण्यै
अहङ्कारस्वरूपायै
अहङ्कर्तव्यवृत्तिदायै
चेतनाचित्तरूपायै
सर्वचैतन्यदायिन्यै
गुणवैषम्यरूपाढ्य-
महत्तत्त्वाभिमानिन्यै
गुणसाम्याव्यक्तमायामूल-
प्रकृतिसञ्ज्ञिकायै 50
पञ्चीकृतमहाभूत-
सूक्ष्मभूतस्वरूपिण्यै
विद्याऽविद्यात्मिकायै
मायाबन्धमोचनकारिण्यै
ईश्वरेच्छारागरूपायै
प्रकृतिक्षोभकारिण्यै
कालशक्त्यै
कालरूपायै
नियत्यादिनियामिकायै
धूम्रादिपञ्चव्योमाख्यायै
यन्त्रमन्त्रकलात्मिकायै 60
ब्रह्मरूपायै
विष्णुरूपायै
रुद्ररूपायै
महेश्वर्यै
सदाशिवस्वरूपायै
सर्वजीवमय्यै
शिवायै
श्रीवाणीलक्ष्म्युमारूपायै
सदाख्यायै
चित्कलात्मिकायै 70
प्राज्ञतैजसविश्वाख्य-
विराड्सूत्रेश्वरात्मिकायै
स्थूलदेहस्वरूपायै
सूक्ष्मदेहस्वरूपिण्यै
वाच्यवाचकरूपायै
ज्ञानज्ञेयस्वरूपिण्यै

कार्यकारणरूपायै
तत्तत्त्वाधिदेवतायै
दशनादस्वरूपायै
नाडीरूपाब्जकुण्डल्यै
अकारादिक्षकारान्तवैखरी-
वाक्स्वरूपिण्यै 80
वेदवेदाङ्गरूपायै
सूत्रशात्रादिरूपिण्यै
पुराणरूपायै
सद्धर्मशात्ररूपायै
परात्परस्यै
आयुर्वेदस्वरूपायै
धनुर्वेदस्वरूपिण्यै
गान्धर्वविद्यारूपायै
अर्थशास्त्रादिरूपिण्यै
चतुष्षष्टिकलारूपायै 90
निगमागमरूपिण्यै
काव्येतिहासरूपायै
गानविद्यादिरूपिण्यै
पदवाक्यस्वरूपायै
सर्वभाषास्वरूपिण्यै
पदवाक्यस्फोटरूपायै
ज्ञानज्ञेयक्रियात्मिकायै
सर्वतन्त्रमय्यै
सर्वयन्त्रतन्त्रादिरूपिण्यै
वेदमात्रे 100
ललितायै
महाव्याहृतिरूपिण्यै
अव्याकृतपदानाद्यचिन्त्य-
शक्त्यै
तमोमय्यै
परस्मैज्योतिषे
परब्रह्मसाक्षात्कार-
स्वरूपिण्यै
परब्रह्ममय्यै
सत्यासत्यज्ञानसुधात्मिकायै

श्रीललिताष्टोत्तरशतनामावलिः समाप्ता

# श्रीललिताष्टोत्तरशतनामावलिः (२)

श्रीललिताष्टोत्तरशतनामावलिः समाप्ता

ॐ श्रीमात्रे नमः
देवकार्यसमुद्युतायै
देवर्षिगणसङ्घात
स्तूयमानात्मवैभवायै
भक्तसौभाग्यदायिन्यै
भक्तिप्रियायै
भयापहायै
रागमथन्यै
मदनाशिन्यै
मोहनाशिन्यै
ममताहन्त्र्यै 10
पापनाशिन्यै
क्रोधशमन्यै
लोभनाशिन्यै
संशयघ्न्यै
भवनाशिन्यै
मृत्युमथन्यै
दुर्गायै
दुःखहन्त्र्यै
सुखप्रदायै
दुष्टदूरायै 20
दुराचारशमन्यै
दोषवर्जितायै
सर्वज्ञायै
समानाधिकवर्जितायै
सर्वमन्त्रस्वरूपिण्यै
सर्वयन्त्रात्मिकायै
सर्वतन्त्ररूपायै
महालक्ष्म्यै
महापातकनाशिन्यै
महात्रिपुरसुन्दर्यै 30
चराचरजगन्नाथायै
पार्वत्यै
सृष्टिकर्त्र्यै
गोप्त्र्यै
संहारिण्यै
तिरोधानकर्यै
अनुग्रहदायै
आब्रह्मकीटजनन्यै
वर्णाश्रमविधायिन्यै
निजाज्ञारूपनिगमायै 40
पुण्यापुण्यफलप्रदायै
राक्षसघ्न्यै
करुणारससागरायै
वेदवेद्यायै
सदाचारप्रवर्तिकायै
सद्यः प्रसादिन्यै
शिवङ्कर्यै

शिष्टेष्टायै
शिष्टपूजितायै
गायत्र्यै 50
निःसीममहिम्ने
समस्तभक्तसुखदायै
पुण्यलभ्यायै
बन्धमोचन्यै
सर्वव्याधिप्रशमन्यै
सर्वमृत्युनिवारिण्यै
कलिकल्मषनाशिन्यै
नित्यतृप्तायै
मैत्र्यादिवासनालभ्यायै
हृदयस्थायै 60
दैत्यहन्त्र्यै
गुरुमूर्तये
गोमात्रे
कैवल्यपददायिन्यै
त्रिजगद्वन्द्यायै
वागधीश्वर्यै
ज्ञानदायै
सर्ववेदान्तसंवेद्यायै
योगदायै
निर्द्वैतायै 70
द्वितवर्जितायै
अन्नदायै
वसुदायै
भाषारूपायै
सुखाराध्यायै
राजराजेश्वर्यै
साम्राज्यदायिन्यै
सर्वार्थदात्र्यै
सच्चिदानन्दरूपिण्यै
सरस्वत्यै 80
सनकादिसमाराध्यायै
नामपारायणप्रीतायै
मिथ्याजगदधिष्ठानायै

# श्रीललिताष्टोत्तरशतनामावलिः (३)

रजताचलशृङ्गाग्र-मध्यस्थायै नमो नमः ।
हिमाचलमहावंश-पावनायै नमो नमः ।
शङ्करार्धाङ्गसौन्दर्य-शरीरायै नमो नमः ।
लसन्मरकतस्वच्छ-विग्रहायै नमो नमः ।
महातिशयसौन्दर्य-लावण्यायै नमो नमः ।
शशाङ्कशेखरप्राण-वल्लभायै नमो नमः ।
सदापञ्चदशात्मैक्य-स्वरूपायै नमो नमः ।
वज्रमाणिक्यकटक-किरीटायै नमो नमः ।
कस्तूरीतिलकोद्भासि-निटिलायै नमो नमः ।
भस्मरेखाङ्कितलसन्-मस्तकायै नमो नमः । १०
विकचाम्भोरुहदल-लोचनायै नमो नमः ।
शरच्चाम्पेयपुष्पाभ-नासिकायै नमो नमः ।
लसत्कनकताटङ्क-युगलायै नमो नमः ।
मणिदर्पणसङ्काश-कपोलायै नमो नमः ।
ताम्बूलपूरितस्मेर-वदनायै नमो नमः ।
सुपक्वदाडिमीबीज-रदनायै नमो नमः ।
कम्बुपूगसमच्छाय-कन्धरायै नमो नमः ।
स्थूलमुक्ताफलोदार-सुहारायै नमो नमः ।
गिरीशबद्धमाङ्गल्य-मङ्गलायै नमो नमः ।
पद्मपाशाङ्कुशलसत्-कराब्जायै नमो नमः । २०
पद्मकैरवमन्दार-सुमालिन्यै नमो नमः ।
सुवर्णकुम्भयुग्माभ-सुकुचायै नमो नमः ।
रमणीयचतुर्बाहु-संयुक्तायै नमो नमः ।
कनकाङ्गदकेयूर-भूषितायै नमो नमः ।

बृहत्सौवर्णसौन्दर्य-वसनायै नमो नमः ।
बृहन्नितम्बविलसज्जघनायै नमो नमः ।
सौभाग्यजातशृङ्गार-मध्यमायै नमो नमः ।
दिव्यभूषणसन्दोहरञ्जितायै नमो नमः ।
पारिजातगुणाधिक्य-पदाब्जायै नमो नमः ।
सुपद्मरागसङ्काश-चरणायै नमो नमः । ३०
कामकोटिमहापद्म-पीठस्थायै नमो नमः ।
श्रीकण्ठनेत्रकुमुद-चन्द्रिकायै नमो नमः ।
सचामररमावाणी-वीजितायै नमो नमः ।
भक्तरक्षणदाक्षिण्य-कटाक्षायै नमो नमः ।
भूतेशालिङ्गनोद्भूत-पुलकाङ्ग्यै नमो नमः ।
अनङ्गजनकापाङ्ग-वीक्षणायै नमो नमः ।
ब्रह्मोपेन्द्रशिरोरत्न-रञ्जितायै नमो नमः ।
शचीमुख्यामरवधू-सेवितायै नमो नमः ।
लीलाकल्पितब्रह्माण्ड-मण्डितायै नमो नमः ।
अमृतादिमहाशक्ति-संवृतायै नमो नमः । ४०
एकातपत्रसाम्राज्य-दायिकायै नमो नमः ।
सनकादिसमाराध्यपादुकायै नमो नमः ।
देवर्षिभिः स्तूयमान-वैभवायै नमो नमः ।
कलशोद्भवदुर्वासःपूजितायै नमो नमः ।
मत्तेभवक्त्रषड्वक्त्र-वत्सलायै नमो नमः ।
चक्रराजमहायन्त्र-मध्यवर्त्यै नमो नमः ।
चिदग्निकुण्डसम्भूत-सुदेहायै नमो नमः ।
शशाङ्कखण्डसंयुक्त-मकुटायै नमो नमः ।
मत्तहंसवधूमन्द-गमनायै नमो नमः ।
वन्दारुजनसन्दोह-वन्दितायै नमो नमः । ५०
अन्तर्मुखजनानन्द-फलदायै नमो नमः ।
पतिव्रताङ्गनाभीष्ट-फलदायै नमो नमः ।

अव्याजकरुणापूर-पूरितायै नमो नमः ।
नितान्तसच्चिदानन्द-संयुक्तायै नमो नमः ।
सहस्रसूर्यसंयुक्त-प्रकाशायै नमो नमः ।
रत्नचिन्तामणिगृह-मध्यस्थायै नमो नमः ।
हानिवृद्धिगुणाधिक्य-रहितायै नमो नमः ।
महापद्माटवीमध्य-निवासायै नमो नमः ।
जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः ।
महापापौघपापानां विनाशिन्यै नमो नमः । ६०
दुष्टभीतिमहाभीति-भञ्जनायै नमो नमः ।
समस्तदेवदनुज-प्रेरकायै नमो नमः ।
समस्तहृदयाम्भोज-निलयायै नमो नमः ।
अनाहतमहापद्म-मन्दिरायै नमो नमः ।
सहस्रारसरोजात-वासितायै नमो नमः ।
पुनरावृत्तिरहित-पुरस्थायै नमो नमः ।
वाणीगायत्रीसावित्री-सन्नुतायै नमो नमः ।
रमाभूमिसुताराध्य-पदाब्जायै नमो नमः ।
लोपामुद्रार्चितश्रीम-च्चरणायै नमो नमः ।
सहस्ररतिसौन्दर्य-शरीरायै नमो नमः । ७०
भावनामात्रसन्तुष्ट-हृदयायै नमो नमः ।
सत्यसम्पूर्णविज्ञान-सिद्धिदायै नमो नमः ।
श्रीलोचनकृतोल्लास-फलदायै नमो नमः ।
श्रीसुधाब्धिमणिद्वीप-मध्यगायै नमो नमः ।
दक्षाध्वरविनिर्भेद-साधनायै नमो नमः ।
श्रीनाथसोदरीभूत-शोभितायै नमो नमः ।
चन्द्रशेखरभक्तार्ति-भञ्जनायै नमो नमः ।
सर्वोपाधिविनिर्मुक्त-चैतन्यायै नमो नमः ।
नामपारयणाभीष्ट-फलदायै नमो नमः ।
सृष्टिस्थितितिरोधान-सङ्कल्पायै नमो नमः । ८०

श्रीषोडशाक्षरीमन्त्र-मध्यगायै नमो नमः ।
अनाद्यन्तस्वयम्भूत-दिव्यमूर्त्यै नमो नमः ।
भक्तहंसपरिमुख्य-वियोगायै नमो नमः ।
मातृमण्डलसंयुक्त-ललितायै नमो नमः ।
भण्डदैत्यमहासत्त्व-नाशनायै नमो नमः ।
क्रूरभण्डशिरच्छेद-निपुणायै नमो नमः ।
धरा(धात्र)च्युतसुराधीशसुखदायै नमो नमः ।
चण्डमुण्डनिशुम्भादि-खण्डनायै नमो नमः ।
रक्ताक्षरक्तजिह्वादि-शिक्षणायै नमो नमः ।
महिषासुरदोर्वीर्य-निग्रहायै नमो नमः । ९०
अभ्रकेशमहोत्साह-कारणायै नमो नमः ।
महेशयुक्तनटन-तत्परायै नमो नमः ।
निजभर्तृमुखाम्भोज-चिन्तनायै नमो नमः ।
वृषभध्वजविज्ञान-भावनायै नमो नमः ।
जन्ममृत्युजरारोग-भञ्जनायै नमो नमः ।
विदेहमुक्तिविज्ञान-सिद्धिदायै नमो नमः ।
कामक्रोधादिषड्वर्ग-नाशनायै नमो नमः ।
राजराजार्चितपद-सरोजायै नमो नमः ।
सर्ववेदान्तसंसिद्ध-सुतत्वायै नमो नमः ।
श्रीवीरभक्तविज्ञान-विधानायै नमो नमः । १००
अशेषदुष्टदनुज-सूदनायै नमो नमः ।
साक्षाच्छ्रीदक्षिणामूर्ति-मनोज्ञायै नमो नमः ।
महामेधाग्रसम्पूज्य-महिमायै नमो नमः ।
दक्षप्रजापतिसुत-वेषाढ्यायै नमो नमः ।
सुमबाणेक्षुकोदण्ड-मण्डितायै नमो नमः ।
नित्ययौवनमाङ्गल्य-मङ्गलायै नमो नमः ।
महादेवसमायुक्त-महादेव्यै नमो नमः ।
चतुर्विंशतितत्वैक-स्वरूपायै नमो नमः । १०८

# श्रीहनुमतष्टोत्तरशतनामावलिः

ॐ आञ्जनेयाय नमः
महावीराय
हनूमते
मारुतात्मजाय
तत्वज्ञानप्रदाय
सीतादेविमुद्राप्रदायकाय
अशोकवनकाच्छेत्रे
सर्वमायाविभञ्जनाय
सर्वबन्धविमोक्त्रे
रक्षोविध्वंसकारकाय 10
परविद्या-परीहाराय
परशौर्य-विनाशनाय
परमन्त्र-निराकर्त्रे
परयन्त्र-प्रभेदकाय
सर्वग्रह-विनाशिने
भीमसेन सहायकृते
सर्वदुःख-हराय
सर्वलोकचारिणे
मनोजवाय
पारिजात-द्रुमूलस्थाय 20
सर्वमन्त्र-स्वरूपवते
सर्वतन्त्र-स्वरूपिणे
सर्वयन्त्रात्मकाय
कपीश्वराय नमः
महाकायाय
सर्वरोगहराय
प्रभवे
बलसिद्धिकराय
सर्वविद्या-सम्पत्प्रदायकाय
कपिसेनानायकाय
भविष्यचतुराननाय 30
कुमार-ब्रह्मचारिणे
रत्नकुण्डल-दीप्तिमते
चञ्चलद्वालसन्नद्ध-
लम्बमानशिखोज्वलाय
गन्धर्वविद्यातत्वज्ञाय
महाबल-पराक्रमाय
काराग्रह-विमोक्त्रे
शृङ्खला-बद्धमोचकाय
सागरोत्तारकाय
प्राज्ञाय
रामदूताय 40
प्रतापवते
वानराय
केसरीसुताय
सीताशोक-निवारनाय
अञ्जनागर्भ-सम्भूताय नमः
बालार्कसदृशाननाय
विभीषण-प्रियकराय नमः
दशग्रीव-कुलान्तकाय

लक्ष्मणप्राणदात्रे
वज्र-कायाय 50
महाद्युतये
चिरञ्जीविने
रामभक्ताय
दैत्यकार्य-विघातकाय
अक्षहन्त्रे
काञ्चनाभाय
पञ्चवक्राय
महातपसे
लङ्किनी भञ्जनाय
श्रीमते 60
सिंहिकाप्राण-भञ्जनाय
गन्धमादन-शैलस्थाय
लङ्कापुर-विदाहकाय
सुग्रीव-सचिवाय
धीराय
शूराय
दैत्यकुलान्तकाय
सुवार्चलार्चिताय
महातेजसे
रामचूडामणिप्रदाय 70
कामरूपिणे
पिङ्गलाक्षाय नमः
वार्धिमैनाक-पूजिताय नमः
कबलीकृत-मार्ताण्ड-
मण्डलाय
विजितेन्द्रियाय

रामसुग्रीव-सन्धात्रे
महिरावण-मर्दनाय
स्फटिकाभाय
वागधीशाय
नवव्याकृतिपण्डिताय 80
चतुर्बाहवे
दीनबन्धवे
महात्मने
भक्तवत्सलाय
सञ्जीवननगाहर्त्रे
सुचये
वाग्मिने
दृढव्रताय नमः
कालनेमि-प्रमथनाय
हरिमर्कट-मर्कटाय 90
दान्ताय
शान्ताय
प्रसन्नात्मने
शतकण्ठमदापहर्त्रे
योगिने
रामकथा-लोलाय
सीतान्वेषण-पण्ठिताय
वज्रदंष्ट्राय
वज्रनखाय
रुद्रवीर्य-समुद्भवाय 100
इन्द्रजित्प्रहितामोघ-
ब्रह्मास्त्र-विनिवारकाय
पार्थ-ध्वजाग्रसंवासिने नमः

शरपञ्जरभेधकाय जाम्बवत्प्रीतिवर्धनाय

दशबाहवे सीतासमेतश्रीरामपादसेवा-

लोकपूज्याय नमः दुरन्धराय

श्रीहनुमतष्टोत्तरशतनामावलिः समाप्ता

## नवग्रहाणां समुच्चयाष्टोत्तरशतनामावलिः

आदित्यचन्द्रौ कुजसौम्यजीव-श्रीशुक्रसूर्यात्मजराहुकेतून् ।
नमामि नित्यं शुभदायकास्ते भवन्तु मे प्रीतिकराश्च सर्वे ॥

ॐ ग्रहनायकेभ्यो नमः
लोकसंस्तुतेभ्यो
लोकसाक्षिभ्यो
अपरिमितस्वभावेभ्यो
दयामूर्तिभ्यो
सुरोत्तमेभ्यो
उग्रदण्डेभ्यो
लोकपावनेभ्यो
तेजोमूर्तिभ्यो
खेचरेभ्यो 10
द्वादशराशिस्थितेभ्यो
ज्योतिर्मयेभ्यो
राजीवलोचनेभ्यो
नवरत्नालङ्कृतमकुटेभ्यो
माणिक्यभूषणेभ्यो
नक्षत्राधिपतिभ्यो
नक्षत्रालङ्कृतविग्रहेभ्यो
शक्त्याद्यायुधधारिभ्यो
चतुर्भुजान्वितेभ्यो
सकलसृष्टिकर्तृभ्यो 20
सर्वकर्मपयोनिधिभ्यो
धनप्रदायकेभ्यो
सर्वपापहरेभ्यो
कारुण्यसागरेभ्यो
सकलकार्यकण्ठकेभ्यो
ऋणहर्तृभ्यो
धान्याधिपतिभ्यो
भारतीप्रियेभ्यो
भक्तवत्सलेभ्यो
शिवप्रदायकेभ्यो 30
शिवभक्तजनरक्षकेभ्यो
पुण्यप्रदायकेभ्यो
सर्वशास्त्रविशारदेभ्यो
सुकुमारतनुभ्यो
कामितार्थफलप्रदायकेभ्यो
अष्टैश्वर्यप्रदायकेभ्यो
ब्रह्मविद्भ्यो
महद्भ्यो
सात्विकेभ्यो
सुराध्यक्षेभ्यो 40
कृत्तिकाप्रियेभ्यो
रेवतीपतिभ्यो
मङ्गलकरेभ्यो
मतिमतांवरिष्ठेभ्यो

मायाविवर्जितेभ्यो
सदाचारसम्पन्नेभ्यो
सत्यवचनेभ्यो
सर्वसम्मतेभ्यो
मधुरभाषिभ्यो
ब्रह्मपरायणेभ्यो 50
सुनीतिभ्यो
वचनाधिकेभ्यो
शिवपूजातत्परेभ्यो
भद्रप्रियेभ्यो
भाग्यकरेभ्यो
गन्धर्वसेवितेभ्यो
गम्भीरवचनेभ्यो
चतुरेभ्यो
चारुभूषणेभ्यो
कामितार्थप्रदेभ्यो 60
सकलज्ञानविद्भ्यो
अजातशत्रुभ्यो
अमृताशनेभ्यो
देवपूजितेभ्यो
तुष्टेभ्यो
सर्वाभीष्टप्रदेभ्यो
घोरेभ्यो
अगोचरेभ्यो
ग्रहश्रेष्ठेभ्यो
शाश्वतेभ्यो 70
भक्तरक्षकेभ्यो
भक्तप्रसन्नेभ्यो

पूज्येभ्यो
धनिष्ठाधिपेभ्यो
शतभिषक्पतिभ्यो
आमूलालङ्कृतदेहेभ्यो
ब्रह्मतेजोऽभिवर्धनेभ्यो
चित्रवर्णेभ्यो
तीव्रकोपेभ्यो
लोकस्तुतेभ्यो 80
ज्योतिष्मतां परेभ्यो
विविक्तनेत्रेभ्यो
तरणेभ्यो
मित्रेभ्यो
दिवौकोभ्यो
दयानिधिभ्यो
मकुटोज्ज्वलेभ्यो
वासुदेवप्रियेभ्यो
शङ्करेभ्यो
योगीश्वरेभ्यो 90
पाशाङ्कुशधारिभ्यो
परमसुखदेभ्यो
नभोमण्डलसंस्थितेभ्यो
अष्टसूत्रधारिभ्यो
ओषधीनां पतिभ्यो
परमप्रीतिकरेभ्यो
कुण्डलधारिभ्यो
नागलोकस्थितेभ्यो
श्रवणाधिपेभ्यो
पूर्वाषाढाधिपेभ्यो 100

उत्तराषाढाधिपेभ्यो
पीतचन्दनलेपनेभ्यो
उडुगणपतिभ्यो
मेषाधिराशीनां पतिभ्यो
सुलभेभ्यो
नीतिकोविदेभ्यो
सुमनसेभ्यो
आदित्यादिनवग्रह-
देवताभ्यो 108

नवग्रहाणां समुच्चयाष्टोत्तरशतनामावलिः समाप्ता

# श्रीविष्णोः अष्टोत्तरशतनामावलिः

ॐ विष्णवे नमः
लक्ष्मीपतये
कृष्णाय
वैकुण्ठाय
गरुडध्वजाय
परब्रह्मणे
जगन्नाथाय
वासुदेवाय
त्रिविक्रमाय
दैत्यान्तकाय 10
मधुरिपवे
तार्क्ष्यवाहनाय
सनातनाय
नारायणाय
पद्मनाभाय
हृषीकेशाय
सुधाप्रदाय
माधवाय
पुण्डरीकाक्षाय
स्थितिकर्त्रे 20
परात्पराय
वनमालिने
यज्ञरूपाय
चक्रपाणये
गदाधराय
उपेन्द्राय
केशवाय
हंसाय
समुद्रमथनाय
हरये 30
गोविन्दाय
ब्रह्मजनकाय
कैटभासुरमर्दनाय
श्रीधराय
कामजनकाय
शेषशायिने
चतुर्भुजाय
पाञ्चजन्यधराय
श्रीमते
शार्ङ्गपाणये 40
जनार्दनाय
पीताम्बरधराय
देवाय
सूर्यचन्द्रविलोचनाय
मत्स्यरूपाय
कूर्मरूपाय
क्रोडरूपाय
नृकेसरिणे
वामनाय
भार्गवाय 50

रामाय
हलिने
कृष्णाय
हयाननाय
विश्वम्भराय
शिशुमाराय
श्रीकराय
कपिलाय
ध्रुवाय
दत्तात्रेयाय 60
अच्युताय
अनन्ताय
मुकुन्दाय
दधिवामनाय
धन्वन्तरये
श्रीनिवासाय
प्रद्युम्नाय
पुरुषोत्तमाय
श्रीवत्सकौस्तुभोरस्काय
मुरारातये 70
अधोक्षजाय
ऋषभाय
मोहिनीरूपधारिणे
सङ्कर्षणाय
पृथवे
क्षीराब्धिशायिने
भूतात्मने
भगवते
भक्तवत्सलाय
अनिरुद्धाय 80
अप्रमेयात्मने
त्रिधाम्ने
भूतभावनाय
श्वेतद्वीपनिवास्तव्याय
सूर्यमण्डलमध्यगाय
सनकादिमुनिध्येयाय
गजेन्द्रवरदाय
नराय
नीलकान्ताय
धराकान्ताय 90
वेदात्मने
बादरायणाय
भागीरथीजन्मभूमि-
पादपद्माय
सतां प्रभवे
स्वभुवे
विभवे
घनश्यामाय
जगत्कारणाय
अव्ययाय
बुद्धावताराय 100
शान्तात्मने
लीलाधृतनराकृतये
दामोदराय
विराड्रूपाय
भूतभव्यभवत्प्रभवे

| | | |
|---|---|---|
| आदिदेवाय देवदेवाय | प्रह्लादपरिपालकाय | 108 |

श्रीविष्णोः अष्टोत्तरशतनामावलिः समाप्ता

## श्रीलक्ष्म्याः अष्टोत्तरशतनामावलिः

पद्मासनां पद्मकरां पद्मनाभोरसि-स्थिताम् ।
क्षीरसागरसम्भूतां क्षीरवर्णसमप्रभाम् ॥
क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम् ।
हारकोटिरकेयूर-कङ्कणादिविराजिताम् ॥
सुवर्णमुक्ताताटङ्कां पूर्णेन्दुसदृशाननाम् ।
इन्दिरामिन्दिरोल्लाससुभगापाङ्गसुन्दरीम् ॥

ॐ प्रकृत्यै नमः
विकृत्यै
विद्यायै
सर्वभूतहितप्रदायै
श्रद्धायै
विभूत्यै
सुरभ्यै
परमात्मिकायै
वाचे
पद्मालयायै 10
पद्मायै
शुचये
स्वाहायै
स्वधायै
सुधायै
धन्यायै
हिरण्मय्यै
लक्ष्म्यै
नित्यपुष्टायै
विभावर्यै 20
अदित्यै
दित्यै
दीप्तायै
वसुधायै
वसुधारिण्यै
कमलायै
कान्तायै
कामायै
क्षीरोदसंभवायै
अनुग्रहप्रदायै 30
बुद्धये
अनघायै
हरिवल्लभायै
अशोकायै
अमृतायै
दीप्तायै

लोकशोकविनाशिन्यै
धर्मनिलयायै
करुणायै
लोकमात्रे 40
पद्मप्रियायै
पद्महस्तायै
पद्माक्ष्यै
पद्मसुन्दर्यै
पद्मोद्भवायै
पद्ममुख्यै
पद्मनाभप्रियायै
रमायै
पद्ममालाधरायै
देव्यै 50
पद्मिन्यै
पद्मगन्धिन्यै
पुण्यगन्धायै
सुप्रसन्नायै
प्रसादाभिमुख्यै
प्रभायै
चन्द्रवदनायै
चन्द्रायै
चन्द्रसहोदर्यै
चतुर्भुजायै 60
चन्द्ररूपायै
इन्दिरायै
इन्दुशीतलायै
आह्लादजनन्यै
पुष्टयै
शिवायै
शिवकर्यै
सत्यै
विमलायै
विश्वजनन्यै 70
तुष्टयै
दारिद्र्यनाशिन्यै
प्रीतिपुष्करिण्यै
शान्तायै
शुक्लमाल्यांबरायै
श्रियै
भास्कर्यै
बिल्वनिलयायै
वरारोहायै
यशस्विन्यै 80
वसुन्धरायै
उदाराङ्गायै
हरिण्यै
हेममालिन्यै
धनधान्यकर्यै
सिद्धये
स्त्रैणसौम्यायै
शुभप्रदायै
नृपवेश्मगतानन्दायै
वरलक्ष्म्यै 90
वसुप्रदायै
शुभायै

| | |
|---|---|
| हिरण्यप्राकारायै | दारिद्र्यध्वंसिन्यै |
| समुद्रतनयायै | देव्यै |
| जयायै | सर्वोपद्रववारिण्यै |
| मंगलायै देव्यै | नवदुर्गायै |
| विष्णुवक्षःस्थलस्थितायै | महाकाल्यै |
| विष्णुपत्न्यै | ब्रह्माविष्णुशिवात्मिकायै |
| प्रसन्नाक्ष्यै | त्रिकालज्ञानसंपन्नायै |
| नारायणसमाश्रितायै 100 | भुवनेश्वर्यै 108 |

श्रीलक्ष्मी-अष्टोत्तरनामावलिः समाप्ता

# श्रीसरस्वत्यष्टोत्तरशतनामावलिः

चतुर्भुजां महादेवीं वाणीं सर्वाङ्गसुन्दरीम् ।
श्वेतमाल्याम्बरधरां श्वेतगन्धानुलेपनाम् ॥
प्रणवासनमारूढां तदर्थत्वेन निश्चिताम् ।
सितेन दर्पणाभेण वस्त्रेणोपरिभूषीताम् ।
शब्दब्रह्मात्मिकां देवीं शरच्चन्द्रनिभाननाम् ॥
अङ्कुशं चाक्षसूत्रं च पाशं वीणां च धारिणीम् ।
मुक्ताहारसमायुक्तां देवीं ध्यायेत् चतुर्भुजाम् ॥

ॐ वाग्देव्यै नमः
शारदायै
मायायै
नादरूपिण्यै
यशस्विन्यै
स्वाधीनवल्लभायै
हाहाहूहूमुखस्तुत्यायै
सर्वविद्याप्रदायिन्यै
रञ्जिन्यै
स्वस्तिकासनायै 10
अज्ञानध्वान्तचन्द्रिकायै
अधिविद्यादायिन्यै
कम्बुकण्ठ्यै
वीणागानप्रियायै
शरणागतवत्सलायै
श्रीसरस्वत्यै
नीलकुन्दलायै
वाण्यै
सर्वपूज्यायै
कृतकृत्यायै 20
तत्त्वमय्यै
नारदादिमुनिस्तुतायै
राकेन्दुवदनायै
यन्त्रात्मिकायै
नलिनहस्तायै
प्रियवादिन्यै
जिह्वासिद्ध्यै
हंसवाहिन्यै
भक्तमनोहरायै
दुर्गायै 30
कल्याण्यै
चतुर्मुखप्रियायै
ब्राह्म्यै
भारत्यै

अक्षराम्तिकायै
अज्ञानध्वान्तदीपिकायै
बालारूपिण्यै
देव्यै
लीलाशुकप्रियायै
दुकूलवसनधारिण्यै 40
क्षीराब्धितनयायै
मत्तमातङ्गगामिन्यै
वीणागानविलोलुपायै
पद्महस्तायै
रणत्किङ्किणिमेखलायै
त्रिलोचनायै
अङ्कुशाक्षसूत्रधारिण्यै
मुक्ताहारविभूषितायै
मुक्तामण्यङ्कितचारुनासायै
रत्नवलयभूषितायै 50
कोटिसूर्यप्रकाशिन्यै
विधिमानसहंसिकायै
साधुरूपिण्यै
सर्वशास्त्रार्थवादिन्यै
सहस्रदलमध्यस्थायै
सर्वतोमुख्यै
सर्वचैतन्यरूपिण्यै
सत्यज्ञानप्रबोधिन्यै
विप्रवाक्स्वरूपिण्यै
वासवार्चितायै 60
शुभ्रवस्त्रोत्तरीयायै
विरिञ्चिपत्न्यै
तुषारकिरणाभायै
भावाभावविवर्जितायै
वदनाम्बुजैकनिलयायै
मुक्तिरूपिण्यै
गजारूढायै
वेदन्ततायै
सर्वलोकसुपूजितायै
भाषारूपायै 70
भक्तिदायिन्यै
मीनलोचनायै
सर्वशक्तिसमन्वितायै
अतिमृदुलपदाम्बुजायै
विद्याधर्यै
जगन्मोहिन्यै
रमायै
हरिप्रियायै
विमलायै
पुस्तकभृते 80
नारायण्यै
मङ्गलप्रदायै
अश्वलक्ष्म्यै
धान्यलक्ष्म्यै
राजलक्ष्म्यै
गजलक्ष्म्यै
मोक्षलक्ष्म्यै
सन्तानलक्ष्म्यै
जयलक्ष्म्यै
खड्गलक्ष्म्यै 90

कारुण्यलक्ष्म्यै
सौम्यलक्ष्म्यै
भद्रकाल्यै
चण्डिकायै
शाम्भव्यै
सिंहवाहिन्यै
सुभद्रायै
महिषासुरमर्दिन्यै
अष्टैश्वर्यप्रदायिन्यै
हिमवत्पुत्रिकायै 100

महाराज्ञ्यै
त्रिपुरसुन्दर्यै
पाशाङ्कुशधारिण्यै
श्वेतपद्मासनायै
चाम्पेयकुसुमप्रियायै
वनदुर्गायै
राजराजेश्वर्यै
श्रीदुर्गालक्ष्मीसहित-
महासरस्वत्यै 108

श्रीसरस्वत्यष्टोत्तरनामावलिः समाप्ता

## श्रीदुर्गाष्टोत्तरशतनामावलिः

ध्यायेत् देवीं महादुर्गां सर्वदुःखनिवारिणीम् ।
सर्वाभीष्टप्रदां गौरीं भक्तानुग्रहकारिणीम् ॥
सम्पूर्णचन्द्रवदनां सर्वज्ञां शिवसुन्दरीम् ।
वराभयकराम्भोजां पाशाङ्कुश-करोज्वलाम् ॥
सावित्रीं सदयां देवीं सर्वमङ्गलदेवताम् ।
सर्वालङ्कारसम्पूर्णां भावये सर्वमङ्गलाम् ॥

ॐ श्रियै नमः
उमायै
भारत्यै
भद्रायै
शर्वाण्यै
विजयायै
जयायै
वाण्यै
सर्वगतायै
गौर्यै 10
वाराह्यै
कमलप्रियायै
सरस्वत्यै
कमलायै
मायायै
मातङ्ग्यै
अजायै
अपरायै
शाकम्भर्यै
शिवायै 20
चण्ड्यै
कुण्डल्यै
वैष्णव्यै
क्रियायै
ऐन्द्र्यै
मात्रे
मधुमत्यै
गिरिजायै
सुभगायै
अम्बिकायै 30
तारायै
पद्मवत्यै
हंस्यै
पद्मनाभसहोदर्यै
अपर्णायै
लज्जितायै

धात्र्यै
कुमार्यै
शिखिवाहनायै
शाम्भव्यै 30
सुमुख्यै
मैत्र्यै
त्रिनेत्रायै
विस्वरूपिण्यै
आर्यायै
मृडान्यै
ह्रीङ्कार्यै
क्रोधिन्यै
सुदिनायै
अचलायै 40
सूक्ष्मायै
परात्परायै
शोभायै
सर्ववर्णायै
हरप्रियायै
महालक्ष्म्यै
महासिद्ध्यै
स्वधायै
स्वाहायै
मनोन्मन्यै 60
त्रिलोकपालिन्यै
उद्भुतायै
त्रिसन्ध्यायै
त्रिपुरान्तकायै

त्रिशक्त्यै
त्रिपदायै
दुर्गायै
ब्राह्म्यै
त्रैलोक्यवासिन्यै
पुष्करायै 70
अत्रिसुतायै
गुढायै
त्रिवर्णायै
त्रिस्वरात्मिकायै
त्रिगुणायै
निर्गुणायै
सत्यायै
निर्विकल्पायै
निरञ्जनायै
ज्वालिन्यै 80
मालिन्यै
चर्चायै
क्रव्यादोपनिबर्हिण्यै
कामाक्ष्यै
कामिन्यै
कान्त्यै
कामदायै
कलहंसिन्यै
सलज्जायै
कुलजायै 90
प्राज्ञायै
प्रभायै

| | | | |
|---|---|---|---|
| मदनसुन्दर्यै | | भुवनेश्वर्यै | |
| वागीश्वर्यै | | नित्यानन्दात्मविभवायै | |
| विशालाक्ष्यै | | सत्यज्ञानायै | |
| महाकाल्यै | | तमोपहायै | |
| महेश्वर्यै | | महेश्वरप्रियकर्यै | |
| चन्द्रायै | | महात्रिपुरसुन्दर्यै | |
| चन्द्रकलाचूडायै | | श्रीवाणिनुत चरित्रायै | |
| भैरव्यै | 100 | श्रीदुर्गापरमेश्वर्यै | 108 |

श्रीदुर्गाष्टोत्तरनामावलिः समाप्ता

## वेङ्कटेश्वर-वराहपूराणान्तर्गत-अष्टोत्तरशतनामावलिः

ॐ श्री वेङ्कटेशाय नमः
शेषाद्रिनिलयाय
वृषदृग्गोचराय
विष्णवे
सदञ्जनगिरीशाय
वृषाद्रिपतये
मेरुपुत्रगिरीशाय
सरस्वामितटीजुषे
कुमारकल्पसेव्याय
वज्रिदृग्विषयाय 10
सुवर्चलासुतन्यस्त-
सैनापत्यभराय
रामाय
पद्मनाभाय
सदावायुस्तुताय
त्यक्तवैकुण्ठलोकाय
गिरिकुञ्जविहारिणे
हरिचन्दनगोत्रेन्द्रस्वामिने
शङ्खराजन्यनेत्राब्जविषयाय
वसूपरिचरत्रात्रे
कृष्णाय 20
अब्धिकन्यापरिष्वक्तवक्षसे
वेङ्कटाय
सनकादिमहायोगिपूजिताय
देवजित्प्रमुखानन्तदैत्य-
सङ्घप्रणाशिने
श्वेतद्वीपवसन्मुक्त-
पूजिताङ्घ्रियुगाय
शेषपर्वतरूपत्व-
प्रकाशनपराय
सानुस्थापितताक्ष्र्याय
ताक्ष्र्याचलनिवासिने
मायानिगूढविमानाय
गरुडस्कन्धवासिने 30
अनन्तशिरसे
अनताक्षाय
अनन्तचरणाय
श्रीशैलनिलयाय
दामोदराय
नीलमेघनिभाय
ब्रह्मादिदेवदुर्दर्शविश्वरूपाय
वैकुण्ठागतसद्धेम-
विमानान्तर्गताय
अगस्त्याभ्यर्चितशेष-
जनदृग्गोचराय
वासुदेवाय 40
हरये
तीर्थपञ्चकवासिने

वामदेवप्रियाय
जनकेष्टप्रदाय
मार्कण्डेयमहातीर्थजात-
पुण्यप्रदाय
वाक्पतिब्रह्मदात्रे
चन्द्रलावण्यदायिने
नारायणनगेशाय
ब्रह्मक्लृप्तोत्सवाय
शङ्खचक्रवरानम्र-
लसत्करतलाय 50
केशवाय
नित्ययौवनमूर्तये
अर्थितार्थप्रदात्रे
विश्वतीर्थाघहारिणे
तीर्थस्वामिसरस्नात-
जनाभीष्टदायिने
कुमारधारिकावास-
स्कन्दाभीष्टप्रदायिने
जानुदघ्नसमुद्भूतपोत्रिणे
कूर्ममूर्तये
किन्नरद्वन्द्वशापान्तप्रदात्रे
विभवे 60
वैखानसमुनिश्रेष्ठपूजिताय
सिंहाचलनिवासाय
श्रीमन्नारायणाय
सद्भक्तनीलकण्ठार्च्याय
नृसिंहाय
कुमुदाक्षगणश्रेष्ठ-
सेनापत्यप्रदाय
दुर्मेधप्राणहन्त्रे
श्रीधराय
क्षत्रियान्तकरामाय
मत्स्यरूपाय 70
पाण्डवारिप्रहर्त्रे
श्रीकराय
उपत्यकाप्रदेशस्थ-
शङ्करध्यातमूर्तये
रुक्माब्जसरसीकूल-
लक्ष्मीकृततपस्विने
लसल्लक्ष्मीकराम्भोज-
दत्तकल्हारकस्रृजे
सालग्रामनिवासाय
नारायणार्चिताशेष-
जनदृग्विषयाय
मृगयारसिकाय
वृषभासुरहारिणे
अञ्जनासुतदात्रे 80
माधवीयाघहारिणे
प्रियङ्गुप्रियभक्षाय
श्वेतकोलवराय
नीलधेनुपयोधारासेक-
देहोद्भवाय
शङ्करप्रियमित्राय
चोलपुत्रप्रियाय
सुधर्मिणीसुचैतन्यप्रदात्रे
मधुघातिने

कृष्णाख्यविप्रवेदान्त-
देशिकत्वप्रदाय
वराहाचलनाथाय 90
बलभद्राय
त्रिविक्रमाय
हृषीकेशाय
अच्युताय
नीलाद्रिनिलयाय
क्षीराब्धिनाथाय
वैकुण्ठाचलवासिने
मुकुन्दाय
अनन्ताय
विरिञ्चाभ्यर्थितानीत-
सौम्यरूपाय 100
सुवर्णमुखरीस्नात-
मनुजाभीष्टदायिने
हलायुधजगत्तीर्थ-
समन्तफलदायिने
गोविन्दाय
श्रीनिवासाय
अलमेलुमङ्गासमेत-
श्री वेङ्कटेशाय
भक्ताभीष्टफलप्रदाय 106

वेङ्कटेश्वराष्टोत्तरशतनामावलिः समाप्ता

## श्रीसुदर्शनाष्टोत्तरशतनामावलिः

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तम्
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शङ्खं गदाब्जे पृथुतरमुषलं चापपाशाङ्कुशान् स्वैः
बिभ्राणां दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञम् ॥

ॐ सुदर्शनाय नमः
चक्रराजाय
तेजोव्यूहाय
महाद्युतये
महस्रबाहवे
दीप्ताङ्गाय
अरुणाक्षाय
प्रतापवते
अनेकादित्यसङ्काशाय
प्रोर्ध्वजालाभिरञ्जिताय 10
सौदामिनीसहस्राभाय
मणिकण्डलशोभिताय
पञ्चभूतमनोरूपाय
षड्कोणान्तरसंस्थिताय
हरान्तःकरणोद्भुत-
रोषभीषणविग्रहाय
हरिपाणिलसत्पद्मविहार-
रमतोहराय
शराकाररूपाय
सर्वज्ञाय
सर्वलोकचितिप्रभवे
चतुर्दशसहस्राराय 20
चतुर्वेदमयाय
अनलाय
भक्तचान्द्रमसज्योतिषे
भवरोगविनाशकाय
रेफात्मकाय
मकारात्मने
रक्षोऽसृग्रूषिताङ्गाय
सर्वदैत्यग्रैवनाल-
विभेदनमहागजाय
भीमदंष्ट्राय
ज्वालाकाराय 30
भीमकर्मणे
त्रिलोचनाय
नीलावर्ष्मणे
नित्यसुखाय
निर्मलाश्रियै
रक्तमाल्याम्बरधराय
रक्तचन्दनरूषिताय

रजोगुणाकृतये
शूराय 40
. . .
वीराराध्याय 100
विश्वरूपाय
वैष्णवाय
विष्णुभक्तिदाय
सत्यव्रताय
सत्यभराय
सत्यधर्मानुषङ्गकाय
नारायणकृपाव्यूह-
तेजःश्चक्राय
सुदर्शनाय 108

श्रीसुदर्शनाष्टोत्तरशतनामावलिः समाप्ता

## श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पाद शङ्करं लोकशङ्करम् ॥
असत्प्रपञ्चश्चतुराननोऽपि सन्नभोगयोगी पुरुषोत्तमोऽपि सन् ।
अनङ्गजेताऽप्यविरूपदर्शनो जयत्यपूर्वो जगदद्वयीगुरुः ॥
आलोक्याननपङ्कजेन दधतं वाणीं सरोजासनम्
शश्वत्सन्निहितक्षमाश्रियममुं विश्वम्भरं पूरुषम् ।
आर्याराधितकोमलाङ्घ्रिकमलं कामद्विषं कोविदाः
शङ्कन्ते भुवि शङ्करं व्रतिकुलालङ्कारमङ्कागताः ॥

ॐ शङ्कराचार्यवर्याय नमः
ब्रह्मज्ञानप्रदायकाय
अज्ञानमितिरादित्याय
सुज्ञानाम्बुधिचन्द्रमसे
वर्णाश्रमप्रतिष्ठात्रे
श्रीमते
मुक्तिप्रदायकाय
शिष्योपदेशनिरताय
भक्ताभीष्टप्रदायकाय
सूक्ष्मतत्त्वरहस्यज्ञाय 10
कार्याकार्यप्रबोधकाय
ज्ञानमुद्राञ्चितकराय
शिष्यहृत्ताप-अपहारकाय
पारिव्राज्याश्रमोद्धर्त्रे
सर्वतन्त्र-स्वतन्त्रधिये
अद्वैत-स्थापनाचार्याय
साक्षाच्छङ्कररूपभृते
षण्मतस्थापनाचार्याय
त्रयीमार्गप्रकाशकाय
वेदवेदान्त-तत्त्वज्ञाय 20
दुर्वादिमत-खण्डनाय
वैराग्यनिरताय
शन्ताय
संसारार्णवतारकाय
प्रसन्नवदनाम्भोजाय
परमार्थ-प्रकाशकाय
पुराण-स्मृतिसारज्ञाय
नित्यतृप्ताय
महते
शुचये 30
नित्यानन्दाय
निरातङ्काय

निस्सङ्गाय
निर्मलात्मकाय
निर्ममाय
निरहङ्काराय
विश्ववन्द्य-पदाम्बुजाय
सत्वप्रधानाय
सद्भावाय 39
सङ्ख्यातीत-गुणोज्ज्वलाय
अनघाय
सारहृदयाय
सुधिये
सारस्वत-प्रदाय
सत्यात्मने
पुण्यशीलाय
साङ्ख्ययोग-विचक्षणाय
तपोराशये
महातेजसे
गुणत्रयविभाग-दलिते 50
कलिघ्नाय
कालधर्मज्ञाय
तमोगुणनिवारकाय
भगवते
भारतीजेत्रे
शारदाह्वानपण्डिताय
धर्माधर्मविभागज्ञाय
लक्ष्यभेदप्रदर्शकाय
नादबिन्दुकलाभिज्ञाय
योगिहृत्पद्म-भास्कराय 60

अतीन्द्रियज्ञान-निधये
नित्यानित्य-विवेकवते
चिदानन्दाय
चिन्मयात्मने
परकायप्रवेशकृते
अमानुषचरित्राढ्याय
क्षेमदायिने
क्षमाकराय
भवाय
भद्रप्रदाय 70
भूरिमहिम्ने
विश्वरञ्जकाय
स्वप्रकाशाय
सदाधाराय
विश्वबन्धवे
शुभोदयाय
विशालकीर्तये
वागीशाय
सर्वलोकहितोत्सुकाय
कैलासयात्रासम्प्राप्त-
चन्द्रमौलिप्रपूजकाय 80
काञ्च्यां श्रीचक्रराजाख्य-
यन्त्रस्थापन-दीक्षिताय
श्रीचक्रात्मकताटङ्क-
पोषिताम्बामनोरथाय
श्रीब्रह्मसूत्रोपनिषद्भाष्यादि-
ग्रन्थकल्पकाय
चतुर्दिक्चतुराम्नाय-प्रतिष्ठात्रे

महामतये
द्विसप्ततिमतोच्छेत्रे
सर्वदिग्विजयप्रभवे
काषायवसनोपेताय
भस्मोद्धूलित-विग्रहाय
ज्ञानात्मकैकदण्डाढ्याय 90
कमण्डलुलसत्कराय
व्याससन्दर्शनप्रीताय
भगवत्पाद-संज्ञकाय
सौन्दर्यलहरीमुख्य-
बहुस्तोत्रविधायकाय
चतुष्षष्टिकलाभिज्ञाय
ब्रह्मराक्षस-पोषकाय
श्रीमन्मण्डनमिश्राख्य-
स्वयम्पूज्यसन्नुताय
तोटकाचार्य-सम्पूज्याय
पद्मपादार्चिताङ्घ्रिकाय
हस्तामलकयोगीन्द्र-
ब्रह्मज्ञानप्रदायकाय 100
सुरेश्वराख्य-सच्छिष्य-
सन्न्यासाश्रमदायकाय
निर्व्याजकरुणामूर्तये
जगत्पूज्याय
जगद्गुरवे
भेरीपटहवाद्यादि-
राजलक्षणलक्षिताय
सकृत्स्मरणसन्तुष्टाय
सर्वज्ञाय
ज्ञानदायकाय 108

श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः समाप्ता